International Journal of Applied Research 2016; 2(10): 685-686




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(10): 685-686
www.allresearchjournal.com
Received: 24-08-2016
Accepted: 25-09-2016

**डॉ. छगन लाल शर्मा**
राष्ट्रीय संस्कृत विद्यापीठ
तिरूपती, आँध्रप्रदेश

**Correspondence**
**डॉ. छगन लाल शर्मा**
राष्ट्रीय संस्कृत विद्यापीठ
तिरूपती, आँध्रप्रदेश

# शब्दवैशिष्ट्यम्

**डॉ. छगन लाल शर्मा**

अतिरोहितमेव शब्दमाहात्म्यं सर्वेषां प्राणीनाम्। न हि शब्दादृते लोकयात्रेयं सुकरा भवितुमर्हति। शब्दाभावे तु इदं कृत्स्नमपि जगत् अन्धतमः स्यात् द्रष्ट्व्यानि वचांसि काव्यदर्शकाराणाम् –
''इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।
शब्दस्य महिमा एतेनापि ज्ञातुं शक्यते यत् षट्स्वपि अङ्गेषु शब्दसाधुत्व–प्रतिपादकस्यैव व्याकरणस्य सर्वाति–शयित्वं दर्शयितुं 'मुखं व्याकरणं स्मृतम्' इति बुधैः जोघुष्यते।
व्याकरणशास्त्रे शब्दवैशिष्ट्यविषयिणी चर्चा श्रीमता तत्र भवता भगवता भर्तृहरिणाऽत्यन्तमनोहारिरीत्या कृता वर्तते। अयं विद्वान् कथयति यत् इदं सर्वमपि जगत् शब्दस्वरूपस्य ब्रह्मणः विवर्तः। श्रीमता सदानन्देन वेदान्तसारे विवर्तलक्षणम् एवम् उक्तम् – '–अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः'। अर्थात् अतात्त्विकः अन्यथा भावः विवर्तः। संसारोऽयं तादृश एव विवर्तः शब्दस्येति उक्तं हरिणा –

''अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

(वाक्यपदीयम्, ब्रह्मकाण्डम्)

अर्थात् यद् अनादिनिधनम्, उत्पत्तिविनाशरहितम्, अत एव नित्यम्, अक्षरं व्यापकं शब्दतत्त्वं शब्दस्वरूपं तद्ब्रह्म, यतो जगतः संसारस्य प्रक्रिया उत्पत्तिस्थितिलया अर्थभावेन – घटपटाद्यात्मना विवर्तते – अतात्विकान्यथाभावापन्नं भवति। अविनाशि नित्यं व्यापकं ब्रह्मैव अर्थभावने – नदीपर्वतगोघटपटादिरूपेण विवर्तते – अतात्विकान्यथाभावापन्नम्भवतीति भावः। संसारोऽयं शब्दस्यैव परिणामश्चेत्याह हरिः –

''शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत।।

(वाक्यपदीयम्, ब्रह्मकाण्डम्, 110)

अर्थात् अयं सर्वोऽपि वाच्यवाचकभेदभिन्नः संसारः शब्दस्य सूक्ष्मस्य वाक्तत्त्वस्य परिणाम इत्याम्नायविदः = वेदविदः विदुः = जानन्ति, न तु वयं कल्पयामः। अतः प्रथमं सर्गादौ विश्वमेतत् छन्दोभ्य एव व्यवर्तत व्यजायत इति भावः। यद्यपीयं जिज्ञासाऽत्र समुदेति यत् प्रथमश्लोके जगच्छब्दविवर्तरूपतयोक्तम्, अनेन श्लोकेन तु परिणामतयोच्यते। तत्र कथं द्वयोर्वादयोः समन्वयः इत्यत्रोच्यते यत् परारूपां वाचमुद्दिश्य विवर्तवादः, पश्यन्त्याख्यां वाचमुद्दिश्य परिणामवादः इति ज्ञाप्यते। भर्तृहरेराचार्यस्य मते शब्दाः नित्याः। तदुक्तं हरिणा –

''नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः''।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।।

(वाक्यपदीयम्, ब्रह्मकाण्डम्, 23)

अर्थात् अष्टाध्यायीसूत्राणाम्, वार्तिकानाम्, महाभाष्यस्य च प्रणेतृभिः पाणिनिकात्यायनपतञ्जलिभिः शब्दाः, शब्दार्थाः, शब्दार्थसम्बन्धाश्च नित्याः समाम्नाताः। तत्र अष्टाध्यायी–सूत्रकृता पाणिनिना ''पृषोदरादीनि यथोपदिष्टम्'' (अष्टाध्यायी 6.3.109) इत्यादिसूत्रैः वार्तिककृता कात्यायनेन ''सिद्धे शब्दार्थसम्बन्धे'' (व्याकरणमहाभाष्यम् 1.1, आ. 1. कात्यायनवार्तिकम्) ''सिद्धन्तु नित्यशब्दत्वात्'' (व्याकरणमहाभाष्यम्, 1. 1, आ. ३, सू. 1 काव्यायनवार्तिकम्) इत्यादि–वार्तिकैः, महाभाष्यकृता पतञ्जलिना – ''संग्रहे एतत् प्राधान्येन परीक्षितं नित्यः शब्दः'' (1.1., आ. 1) ''नित्येषु च शब्देषु

कूटस्थैरविचाालिभिर्वर्णैर्भवितव्यम–नपायोजनविकारिभिः'' (1.1., आ. 2) ''सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते'' (1.1, आ. 5, सू. 20) ''एकः इन्द्रशब्दः क्रतुशते प्रादुर्भूतः सर्वयगेष्वङ्गं भवति'' (1.2, आ. 3 सू. 64) प्रभृतिभिर्भाष्यैः शब्दानाम्, शब्दार्थानाम्, शब्दार्थसम्बन्धानाञ्च नित्यत्वं कण्ठत एव अङ्गीकृतम्।

लोके सर्वाण्यपि कार्याणि शब्दाश्रितानि एव इत्यपि भर्तृहरिणा वाक्यपदीये उक्तम्। तत्र हि –

''न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।'
(वाक्यपदीयम्, ब्रह्मकाण्डम, 121)

ज्ञानस्य शाश्वती नित्या वाग्रूपता यदि निष्क्रामेत् – आगच्छेत् तर्हि प्रकाशो ज्ञानं न प्रकाशेत, प्रकाशाभावात्। यतो हि ज्ञानस्य वाग्रूपता प्रत्यवमर्शिनी वर्तते। किञ्च वाक् सर्वासु सफलासु क्रियासु निष्फलासु चोपदिष्टस्य शयानस्य वा हस्तपादादिकम्पन्नक्रियासु ज्ञानपूर्विकायाः प्रवृत्तेरभावात्। मरणकाले तस्य वाग्रूपस्य चेतनस्योत्क्रान्तौ – अभावे त्वयम्प्राणी काष्ठकुड्यवद् विसंज्ञो दृश्यते। तदुक्तं हरिणा –

''वाग्रूपता चेन्निष्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी।।
अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत्।।''
(वाक्यपदीयम्, ब्रह्मकाण्डम्, 124, 125)

न केवलं भारतीयाः एव शब्दस्यैतादृशं वैशिष्ट्यम् अङ्गीकुर्वन्ति अपितु पाश्चात्याः अपि एतयैव रीत्या शब्दमाहात्म्यं प्रतिपादयन्ति। द्रष्टव्यानि वचांसि 'बाइबल' इति ईशाईधर्मग्रन्थस्य –
"In the beginning was the word and the word was with God and the word was God...... and God Said... let there be light and there was light."
उपर्युक्तपङ्क्तीनाम् अयमेवाशयः यत् शब्दब्रह्मणः एव विवर्तः परिणामो वा इदं कृत्स्नं जगत् इति।

उपयुक्तग्रन्थसूची

1. अष्टाध्यायी – पाणिनिः
2. व्याकरणमहाभाष्यम् – पतन्जलिः (नवाह्निकम्)
3. वाक्यपदीयम् – ब्रह्मकाण्डम्, भर्तृहरिः
4. काव्यादर्शः दण्डी
5. वेदान्तसारः – सदानन्दः
6. भूषणसारतत्त्वप्रकाशिका – प्रो. के.वि. रामकृष्णमाचार्यः
7. संस्कृतव्याकरण दर्शन – डॉ. भीमसिंह वेदालङ्कार
8. परमलघुमन्जूषा – नागेशभट्टः
9. वैयाकरण सिद्धान्तलघुमन्जूषा – नागेशभट्टः
10. वैयाकरणभूषणनिबन्धसंग्रहः
11. संस्कृत व्याकरण का इतिहास – युधिष्ठिर मीमांसकः
12. अष्टाध्यायीकाशिकावृत्तिः, चौखम्भासंस्कृतप्रतिष्ठान, दिल्ली।
13. काशिकावृत्तिसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्, डॉ. मोहनदत्त शर्मा, पूना, 1974।
14. प्रौढमनोरमा, श्रीभट्टोजिदीक्षितः, चौखम्भा कृष्णदास अकादमी, वाराणसी, संस्करणः पुनर्मुद्रित, वि.सं0 2064ः
15. प्रौढमनोरमा शब्दरत्न–भैरवी–भावप्रकाशसरलोपेता, चौखम्भा, वाराणसी।
16. महाभाष्यम् (म.भा.) भारतीयाद्यिशासनसंरक्षकतायां प्रकाशितम् भागत्रयात्मकम्, मोतीलाल बनारसीदास, 1967।
17. लघुशब्देन्दुशेखरः नागेशभट्टः चौखम्भा पब्लिशर्स, वाराणसी, संस्करण 2004
18. शब्दकौस्तुभः प्रथमभागः, चौखम्भा, 1929।
19. शब्दकौस्तुभः, द्वितीयभागः, चौखम्भा, 1929।
20. सिद्धान्तकौमुदी तत्त्वबोधिन्या सह. (सि.कौ.त.) निर्णयसागरप्रकाशनम्, मुम्बई, 1936।
21. सिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीयुता (सि.कौ.बा.त.) मोतीलाल बनारसीदास, देहली, 1964।
22. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, प्र.सं. 2007 (संवत)।
23. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, द्वि.सं. 2020 (संवत)।